**दिनाङ्क :-18.02.2026** **प्रात: - 06:55**

**भारत-फ्रांस:**

भारत-फ्रांस्-देशयोः विशेष-वैश्विक-रणनीतिक-सहभागितायाः अभिवर्धनार्थं ह्यः द्वयोः देशयोः मध्ये विशेषसहमतिः सञ्जाता । सम्मेलने आहत्य एकविंशतिः परिणामाः बहिरागताः । एतेषां कार्यान्वयनस्य नियमितरूपेण समीक्षायै वार्षिक-विदेशमन्त्रि-संवादस्य स्थापनायाः कृते उभयपक्षेण सहमतिः अभवत्। भारत-फ्रांस् नवीनतावर्षस्य, भारत-फ्रांस-नवाचार-जालस्य च प्रारम्भार्थं द्वयोः राष्ट्रयोः सहमतिः वर्तते। मुम्बई-नगरस्य लोकभवने फ्रांस-राष्ट्रपतिना इमैनुएल-मैक्रोन्-इत्यनेन सह संयुक्तवक्तव्यं दत्वा प्रधानमन्त्री श्रीमोदी प्रतिपादितवान् यत् एषः सहयोगः, न केवलं सामरिकः, अपितु अद्यतन-अस्थिर-वैश्विक-स्थितेः मध्यं, वैश्विक-स्थिरतायाः समृद्धेः च कृते अपि अस्ति । श्रीमोदी अवदत् यत् भारतस्य फ्रान्स-देशस्य च सम्बन्धाः अतीव विशेषाः सन्ति, यत्र फ्रान्स-देशः भारतस्य प्राचीनतमेषु सामरिक-सहभागिषु अन्यतमः अस्ति।

**प्रधानमन्त्री-द्विपक्षीय-सभा :**

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्यां, इण्डिया-एआइ-इम्पैक्ट् शिखरसम्मेलले भागं गृहीतुम् आगतानाम्, अनेकैः वैश्विकनेतृभिः सह मिलिष्यति । श्रीमोदी, स्पेनदेशस्य राष्ट्रपतिः पेड्रो सांचेज्, फिन्लैण्ड्देशस्य प्रधानमन्त्री एंटी पेटेरी ओर्पो, सर्बियादेशस्य राष्ट्रपतिः अलेक्जेण्डर् वुसिक्, क्रोएशिया-देशस्य प्रधानमन्त्री आन्द्रेज् प्लेन्कोविच्, एस्टोनिया-देशस्य राष्ट्रपतिः अलार् कारिस्, भूटानदेशस्य प्रधानमन्त्री दाशो शेरिंग् तोबगे, कजाकिस्तान-देशस्य प्रधानमन्त्री ओल्झास् बेक्टोनोवेन च सह मेलनं करिष्यति ।

**एआइ शिखरसम्मेलन - तृतीयदिवसस्य कार्यक्रमः**

अद्य इण्डिया-एआइ-इम्पैक्ट-समिट इत्यस्य भारत-कृतक-बुद्धिमत्ता-प्रभाव-शिखर-सम्मेलनस्य तृतीयदिने शोधसंगोष्ठी भविष्यति । एस्टोनियादेशस्य

राष्ट्रपतिः अलार कारीस्, इलेक्ट्रॉनिक्स-सूचना-प्रौद्योगिकीमन्त्री अश्विनीवैष्णवः, राज्यमन्त्री जितिनप्रसादः इत्येतैः सह अन्ये च चर्चायां भागं गृह्णन्ति। अस्मिन् सत्रे **इण्डिया एआइ इम्पैक्ट् शिखरसम्मेलनस्य समग्रदृष्टिः, प्राथमिकता, कार्यसूचना च** इत्यस्य चर्चा भविष्यति। **"स्थायिविकास-लक्ष्याणां परं वैश्विकविकासाय, कृत्रिमबुद्धिः, पुनराकारं कथं प्रदास्यति"** इत्यस्मिन् विषये अपि सत्रं निर्धारितम् अस्ति ।

**<u>बांग्लादेश-मोदी</u>**

प्रधानमन्त्री नरेन्द्र मोदी, बाङ्गलादेशस्य स्व-समकक्षाय, तारिक रहमान इत्यस्मै स्वपरिवारेण सह भारतं आगन्तुं निमन्त्रणं प्रदत्तवान् । श्रीमोदी, तारिक रहमानाय लिखिते पत्रे, द्वयोः राष्ट्रयोः बहुपक्षीय-द्विपक्षीयसम्बन्धं अधिकं सुदृढं कर्तुं, बीएनपी-नेत्रा सह निकटतया कार्यं कर्तुं, स्वस्य उत्सुकतां प्रकटितवान्। प्रधानमन्त्री श्रीरहमानस्य निर्वाचन-विजयस्य अभिनन्दनं कृतवान्। प्रधानमन्त्रिणा प्रोक्तं यत्, बांग्लादेशस्य संपर्कः, व्यापारः, प्रौद्योगिकी, शिक्षा, कौशलविकासः, ऊर्जा, स्वास्थ्यसेवा, सांस्कृतिक-परम्परा, जन-जन-आदान-प्रदानम्, इत्यादिषु विस्तृतक्षेत्रेषु सहकार्यं वर्धयितुं सः उत्सुकः अस्ति ।

**<u>राष्ट्रपतिः</u>**

राष्ट्रपतिः द्रौपदी मुर्मूः अद्य आन्ध्रप्रदेशस्य विशाखापत्तने ऐषमः आइ-एफ्-आर् इति अन्ताराष्ट्रिय-नौसेना-समीक्षा-कार्यक्रमे भागं गृहीष्यति। सशस्त्रसेनानां सर्वोच्च-सेनापतित्वेन राष्ट्रपतिः अनुष्ठानात्मक-दलानां समीक्षां करिष्यति, भारतस्य नौसैनिकशक्तेः समुद्रीयक्षमतायाः च अद्भुत-प्रदर्शनस्य साक्षी भविष्यति ।

-

**क्रिकेट-विंशति-विंशतिः**

विंशतिम्-प्रतिविंशतिः-क्रिकेट्-विश्वचषक-क्रीडायां, मुम्बई नगरस्य वांखेडे क्रीडांगणे, ह्यः सायम् नेपाल-दलेन स्कॉट्लैण्ड्-दलम्, सप्तस्तोभकैः पराजितम् । अद्य भारत-नीदरलैंड-दलयोः मध्ये सायं सप्तवादने प्रतिस्पर्धा भविष्यति ।